Guru Gobind Singh Public School, Chas

Class:- X

SPECIAL ASSIGNMENT-3 [2020-211

SUBJECT — Sanskrit

प्रिय छात्रों, आज हम सब प्रथम पाठ पढ़ेंगे। बच्चों, हमारे प्रथम पाठ का नाम 'शुचि पर्यावरणं'है।इस पाठ में कवि श्री हरिदत्त शर्मा ने महानगरों की यांत्रिक बहुलता से बढ़ते प्रदूषण पर चिंता व्यक्त करते हुए कहा है कि यह लौहचक्र तन मन का शोषक है, जिससे वायुमंडल और भूमंडल दोनों ही मलिन हो रहे हैं। कवि महानगरीय जीवन से दूर नदी, निर्झर, वृक्ष समूह, लता कुंज एवं पक्षियों से गुंजित वन प्रदेशों की ओर चलने की अभिलाषा व्यक्त करते हैं।

प्रथम पाठः

शुचिपर्यावरणम्

प्रस्तुत पाठ आधुनिक संस्कृत कवि हरिदत्त शर्मा के रचना संग्रह 'लसल्लतिका' से संकलित है। इसमें कवि ने महानगरों की यांत्रिक-बहुलता से बढ़ते प्रदूषण पर चिन्ता व्यक्त करते हुए कहा है कि यह लौहचक्र तन-मन का शोषक है, जिससे वायुमण्डल और भूमण्डल दोनों मलिन हो रहे हैं। कवि महानगरीय जीवन से दूर, नदी-निर्झर, वृक्षसमूह, लताकुञ्ज एवं पक्षियों से गुञ्जित वनप्रदेशों की ओर चलने की अभिलाषा व्यक्त करता है।

दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्।
शुचि-पर्यावरणम्॥
महानगरमध्ये चलदनिशं कालायसचक्रम्।
मनः शोषयत् तनुः पेषयद् भ्रमति सदा वक्रम्॥
दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्। शुचि...॥1॥



कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।
वाष्पयानमाला संधावति वितरन्ती ध्वानम्॥
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्। शुचि...॥2॥

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्॥
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्। शुचि...॥3॥

कञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम्।
प्रपश्यामि ग्रामान्ते निर्झर-नदी-पयःपूरम्॥
एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्। शुचि...॥4॥

हरिततरूणां ललितलतानां माला रमणीया।
कुसुमावलिः समीरचालिता स्यान्मे वरणीया॥
नवमालिका रसालं मिलिता रुचिरं संगमनम्। शुचि...॥5॥

अयि चल बन्धो! खगकुलकलरव गुञ्जितवनदेशम्।
पुर-कलरव सम्भ्रमितजनेभ्यो धृतसुखसन्देशम्॥
चाकचिक्यजालं नो कुर्याज्जीवितरसहरणम्। शुचि...॥6॥

प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः।
पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा॥
मानवाय जीवनं कामये नो जीवन्मरणम्। शुचि...॥7॥

शब्दार्थाः

दुर्वहम्	–	दुष्करम्	–	कठिन, दूभर
जीवितम्	–	जीवनम्	–	जीवन
अनिशम्	–	अहर्निशम्	–	दिन-रात
कालायसचक्रम्	–	लौहचक्रम्	–	लोहे का चक्र
शोषयत्	–	शुष्कीकुर्वत्	–	सुखाते हुए
तनुः	–	शरीरम्	–	शरीर
पेषयद्	–	पिष्टीकुर्वत्	–	पीसते हुए
वक्रम्	–	कुटिलम्	–	टेढ़ा
दुर्दान्तैः	–	भयङ्करैः	–	भयानक (से)
दशनैः	–	दन्तैः	–	दाँतों से
अमुना	–	अनेन	–	इससे
जनग्रसनम्	–	जनभक्षणम्	–	मानव विनाश
कज्जलमलिनम्	–	कज्जलेन मलिनम्	–	काजल-सा मलिन (काला)
धूमः	–	अग्निवाहः	–	धुआँ
मुञ्चति	–	त्यजति	–	छोड़ता है
शतशकटीयानम्	–	शकटीयानानां शतम्	–	सैकड़ों मोटर गाड़ियाँ
वाष्पयानमाला	–	वाष्पयानानां पंक्तिः	–	रेलगाड़ी की पंक्ति
वितरन्ती	–	ददती/वितरणं कुर्वाणा	–	देती हुई
ध्वानम्	–	ध्वनिम्	–	कोलाहल
संसरणम्	–	सञ्चलनम्	–	चलना
भृशं	=	अत्यधिकम्	–	अत्यधिक
भक्ष्यम्	–	खाद्यपदार्थ	–	भोज्य पदार्थ
समलम्	–	मलेन युक्तम्	–	मलयुक्त, गन्दगी से युक्त
ग्रामान्ते	–	ग्रामस्य सीमायाम् (सीम्नि)	–	गाँव की सीमा पर
पयःपूरम्	–	जलाशयम्	–	जल से भरा हुआ तालाब

कान्तारे	–	वने	–	जंगल में
कुसुमावलिः	–	कुसुमानां पंक्तिः	–	फूलों की पंक्ति
समीरचालिता	–	वायुचालिता	–	हवा से चलायी हुई
रसालम्	–	आम्रम्	–	आम
रुचिरम्	–	सुन्दरम्	–	सुन्दर
खगकुलकलरव	–	खगकुलानां कलरवः (पक्षिसमूहध्वनिः)	–	पक्षियों के समूह की ध्वनि
चाकचिक्यजालम्	–	कृत्रिमं प्रभावपूर्णं जगत्	–	चकाचौंध भरी दुनिया
प्रस्तरतले	–	शिलातले	–	पत्थरों के तल पर
लतातरुगुल्माः	–	लताश्च तरवश्च गुल्माश्च	–	लता, वृक्ष और झाड़ी
पाषाणी	–	पर्वतमयी	–	पथरीली
निसर्गे	–	प्रकृत्याम्	–	प्रकृति में

अभ्यासः

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-
   (क) कविः किमर्थं प्रकृतेः शरणम् इच्छति?
   (ख) कस्मात् कारणात् महानगरेषु संसरणं कठिनं वर्तते?
   (ग) अस्माकं पर्यावरणे किं किं दूषितम् अस्ति?
   (घ) कविः कुत्र सञ्चरणं कर्त्तुम् इच्छति?
   (ङ) स्वस्थजीवनाय कीदृशे वातावरणे भ्रमणीयम्?
   (च) अन्तिमे पद्यांशे कवेः का कामना अस्ति?

2. सन्धिं/सन्धिविच्छेदं कुरुत-
   (क) प्रकृतिः + ... = प्रकृतिरेव
   (ख) स्यात् + ... + ... = स्यान्नैव
   (ग) ..... + अनन्ताः = ह्यनन्ताः

(घ) वहिः + अन्तः + जगति = ...

(ङ) ..... + नगरात् = अस्मान्नगरात्

(च) सम् + चरणम् = ...

(छ) धूमम् + मुञ्चति = ...

3. अधोलिखितानाम् अव्ययानां सहायतया रिक्तस्थानानि पूरयत-

भृशम्, यत्र, तत्र, अत्र, अपि, एव, सदा, बहिः

(क) इदानीं वायुमण्डलं ..... प्रदूषितमस्ति।

(ख) ..... जीवनं दुर्वहम् अस्ति।

(ग) प्राकृतिक-वातावरणे क्षणं सञ्चरणम् ..... लाभदायकं भवति।

(घ) पर्यावरणस्य संरक्षणम् ..... प्रकृतेः आराधना।

(ङ) ..... समयस्य सदुपयोगः करणीयः।

(च) भूकम्पित-समये ..... गमनमेव उचितं भवति।

(छ) ..... हरीतिमा ..... शुचि पर्यावरणम्।

4. उदाहरणमनुसृत्य अधोलिखित-पदेषु प्रकृतिप्रत्ययविभागं/संयोगं कुरुत-

यथा-जातम् = जन् + क्त

(क) प्र + कृ + क्तिन् = ...

(ख) नि + सृ + क्त + टाप् = ...

(ग) ..... + क्त = दूषितम्

(घ) ..... + ... = करणीयम्

(ङ) ..... + यत् = भक्ष्यम्

(च) रम् + ... + ... = रमणीया

(छ) ..... + ... + ... = वरणीया

(ज) पिष् + ... = पिष्टाः

5. अधोलिखितानां पदानां पर्यायपदं लिखत-

(क) सलिलम् .....

(ख) आम्रम् .....

(ग) वनम् .....

(घ) शरीरम् .....

(ङ) कुटिलम् .....

(च) पाषाणम् .....

6. उदाहरणमनुसृत्य पाठात् चित्वा च समस्तपदानि लिखत-

यथा-विग्रह पदानि	समस्तपद	समासनाम
(क) मलेन सहितम्	समलम्	अव्ययीभाव
(ख) हरिताः च ये तरवः (तेषां)	.....	कर्मधारय
(ग) ललिताः च याः लताः (तासाम्)	.....	कर्मधारय
(घ) नवा मालिका	.....	कर्मधारय
(ङ) धृतः सुखसन्देशः येन (तम्)	.....	बहुव्रीहि
(च) कज्जलम् इव मलिनम्	.....	कर्मधारय
(छ) दुर्दान्तैः दशनैः	.....	कर्मधारय

7. रेखाङ्कित-पदमाधृत्य प्रश्ननिर्माणं कुरुत-

(क) शकटीयानम् कज्जलमलिनं धूमं मुञ्चति।

(ख) उद्याने पक्षिणां कलरवं चेतः प्रसादयति।

(ग) पाषाणीसभ्यतायां लतातरुगुल्माः प्रस्तरतले पिष्टाः सन्ति।

(घ) महानगरेषु वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति।

(ङ) प्रकृत्याः सन्निधौ वास्तविकं सुखं विद्यते।

परीक्षोपयोगी प्रश्नाः (*Exam Related Useful Questions*)

1. अधोलिखितान् पद्यान् पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत– (6)

Answer the given questions in Sanskrit after reading the following verses :

1

दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्।
शुचि-पर्यावरणम्॥
महानगरमध्ये चलदनिशं कालायसचक्रम्।
मनः शोषयत् तनुः पेषयद् भ्रमति सदा वक्रम्॥
दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्।

प्रश्नाः (*Questions*) :

I. एकपदेन उत्तरत– (1 × 2 = 2)

(*i*) अत्र किं दुर्वहं जातम् ?

(*ii*) कुत्र कालायसचक्रम् अनिशं चलति ?

II. पूर्णवाक्येन उत्तरत– (2 × 1 = 2)

जनग्रसनं कैः न स्यात् एव ?

III. निर्देशानुसारं प्रदत्तविकल्पेभ्यः शुद्धम् उत्तरं चित्वा लिखत– (½ × 4 = 2)

(क) 'सुवहम्' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(*i*) अत्र (*ii*) दुर्वहम् (*iii*) जातम्

(ख) 'लौहचक्रम्' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(*i*) कालायसचक्रम् (*ii*) अनिशम् (*iii*) चलद्

(ग) 'शुचि पर्यावरणम्' इत्यनयोः पदयोः विशेष्यपदं किम् ?

(*i*) शुचि (*ii*) आवरणम् (*iii*) पर्यावरणम्

(घ) 'भ्रमति' इति क्रियापदस्य कर्तृपदं किम् ?

(*i*) चक्रम् (*ii*) कालायसचक्रम् (*iii*) कालायस

उत्तराणि (*Answers*) :

I. (*i*) जीवितम्। (*ii*) महानगरमध्ये।

II. अमुना दुर्दान्तैः दशनैः जनग्रसनं न स्यात् एव।

III. (क) (*ii*) दुर्वहम् (ख) (*i*) कालायसचक्रम्

(ग) (*iii*) पर्यावरणम् (घ) (*ii*) कालायसचक्रम्।